International Journal of Sanskrit Research 2018; 4(4): 67-72
Tirupati, Andhra Pradesh, India

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(4): 67-72
© 2018 IJSR
www.anantaajournal.com
Received: 12-05-2018
Accepted: 13-06-2018

**Sukanta Ghosh**
Research Scholar,
Department of Education,
Rashtriya Sanskrit Vidyapeetha,
Tirupati, Andhra Pradesh, India

**Correspondence**
**Sukanta Ghosh**
Research Scholar,
Department of Education,
Rashtriya Sanskrit Vidyapeetha,

# पश्चिमबङ्गराज्ये स्नातकस्तरीय संस्कृतशिक्षणस्य मूल्याङ्कनपद्धतेः समीक्षणम्

**Sukanta Ghoshs**

## प्रस्तावना

व्यक्तीनां प्रतिभास्वरूपं निर्णेतुं यानि साधनानि तेषां समाहारः परीक्षा। मानवजीवने परीक्षा सर्वसामान्यैव। चारित्रिकाधारानुसारं ख्री. पू. 2200 वर्षतः चीनदेशे जातीयपरीक्षाविधानमासीदिति ज्ञायते। आमेरिकादेशे कैम्ब्रिजविश्वविद्यालये 1702 तमे वर्षे प्रथमतया लिखितपरीक्षायाः प्रारम्भोऽभवत्। मौखिकपरीक्षा त्रयोदशशताब्दौ अव पैरिश तथा वेलोग्ना विश्वविद्यालययोः प्रारम्भः कृतः। अस्माकं देशे वुडडिस्पैच (Wood Despatch) सूचनानुसारं 1857 तमे वर्षे आङ्ग्लशासकैः संस्थापितेषु त्रिषु विश्वविद्यालयेषु परीक्षाविधानं प्रारब्धम्।

परीक्षा नाम सम्यक् चिन्तनम्, अन्वेषणं, छात्रैः प्राप्तस्य ज्ञानस्य सामर्थ्यस्य च संशोधनम्। अस्मिन् क्षेत्रे मोरिसपिलिनरमहोदययोः महद्योगदानं वर्तते। कोनाटनमहोदयः स्वीये 'The Validity of Examination' नामके ग्रन्थे एवं निरूपितवान् – परीक्षाः विद्या-प्रमाणीभूताः, एताः अध्यापकानां छात्राणाञ्च प्रोत्साहनमुत्प्रेरणञ्च, परिपालनसाधनानि सामाजिकनिर्माणसाधनानि च ।

भारते मूल्याङ्कनक्षेत्रे संस्करणोद्यमः 1953 तमे वर्षे प्रारब्धः येन परीक्षाविधाने आमूलं परिवर्तनं जातम्। बेञ्जामिन् ब्लूममहाशयः भारतमागत्य विविधप्रान्तेषु भिन्न-भिन्नशिक्षासंस्थाः परिशील्य महत्त्वपूर्णां सूचनामकुर्वन्। तदाधारेण तस्मिन्नेववत्सरे केन्द्रीयसर्वकारेण जातीयमूल्याङ्कनसंस्थायाः (Central Evaluation Unit) प्रातिष्ठा कृता।

**मूल्याङ्कनस्य क्षेत्रम्** – छात्राणां सर्वाङ्गीणविकास एव शिक्षायाः मुख्योद्देश्यम्। अत्र शारीरिक-बौद्धिक-वैयक्तिक-नैतिक-सामाजिकध्यात्मिकतादयः अंशाः अन्तर्भवन्ति। कस्यामपि मूल्याङ्कन-पद्धतौ सर्वेषां विकासानां परीक्षणं भवेत्। ज्ञानोपलब्धिविकासाभ्यामुपलब्धिपरीक्षापत्रमपेक्षते। अन्येषां विकासानां परीक्षणाय पृथक् पृथक् पत्राण्यावश्यकानि भवन्ति।

**मूल्याङ्कनस्य साधनानि**

क. **परीक्षापत्रनिर्माणम्** – परीक्षापत्रे त्रयो गुणाः अवश्यमभिलषणीयाः।

१. **प्रामाणिकता** – आदर्शपूर्णस्य परीक्षापत्रस्य प्रामाणिकता मुख्यं लक्षणं भवति। Stodola महोदयः Basic Educational Test a Measurement नामके ग्रन्थे प्रामाणिकतामेवम् उल्लिखितम् - The term validity refers to the effectiveness of a test in achieving specified purposes. यानि उद्देश्यानि शिक्षणस्यापेक्षितानि तेषां पूरणं यत्र तत्रैव भवति प्रामाणिकता। अध्यापकः एकं लघुनिबन्धं लेखयितुं छात्रान् आज्ञापयति। परं तस्मिन् विषये छात्राणां ज्ञानं नास्ति। यदि ते लिखन्ति तर्हि केवलं भाषायाः व्यक्तीकरणं भवति। अतोऽत्र प्रामाणिकता नास्ति। यतो हि शिक्षणोद्देश्यानुसारं प्रश्नपत्रं नास्ति।

२. **विश्वसनीयता** – निबन्धात्मकप्रश्नपत्रे अन्यान्यपरीक्षकाः भिन्नान् अङ्कान् दास्यन्ति। एकस्यैव प्रश्नस्य समाधानायैकः अधिकाङ्कान् ददाति। अन्यः न्यूनान् अङ्कान् ददाति। वस्तुगतप्रश्नानां समाधानं निश्चितं सीमितञ्च भवति। अङ्कानां तारतम्यं भवेदेव। एतादृशपरीक्षापत्रेषु विश्वसनीयता भवति। मूल्याङ्कनमपि संगणकयन्त्रेणापि क्रियते।

३. **उपयोगिता** – सर्वप्रथमं प्रश्नपत्रस्य विस्तारस्य विचारः भवति। पुनः प्रश्नस्य कठिनतानुसारम् अङ्कनिर्धारणं करणीयम्। प्रश्नपत्रे द्वौ भागौ निबन्धात्मक-वस्तुगतात्मकौ पृथक् पृथक् भवेत्। प्रश्नानामुत्तरं प्रश्नपत्रे निश्चिते एव स्थाने लेखनीयम्। वस्तुगतस्य निबन्धात्मकस्य च कियान् समयः दत्तः इत्यपि सूचनीयः।

४. **शिक्षकस्य संसिद्धता** – Teacher is always a student. इति वत् शिक्षकेण मूल्याङ्कनविषये परीक्षापत्रविषये च बहुचिन्तनीयम्। प्रश्नपत्रं तावत् शिक्षासिद्धान्तानामानुगुण्यं निर्मेयम्। समयः, अङ्कानां विभाजनम् इत्यादिषु च ध्यानं प्रदेयम्। प्रत्येकस्य छात्रस्य प्राप्ताङ्कसूचीः Profile शैक्षणिकविकासाभिलेखनं Cummulative Record सज्जीकरणीय।

**ख. परीक्षापत्रस्वरूपम्**

क. अन्तर्मूल्याङ्कनम् (Internal Assessment) सम्पूर्णान्तर्मूल्याङ्कनमत्र छात्राः यत्र पठन्ति तत्रत्याः विद्यालयाधिकारिणः एव परीक्षानिर्वहणं कुर्वन्ति। फलमपि तत्रैव निर्णीयते। छात्र द्वारा शैक्षणिकसत्रे कृतानां सर्वेषां कार्याणां दैनिकगतिविधीनाञ्च परीक्षणम् आन्तरिकमूल्याङ्कनं भवति। आन्तरिकमूल्याङ्कनं छात्राणां दैनिकप्रगतिः, गृहकार्यं, विभिन्नसाहित्यिकेषु कार्य-क्रमेषु प्रदर्शितं कौशलं, सामयिकपरीक्षाणां परिणामाञ्चाश्रित्य भवेत्। P.E. Vernon महोदयः Types of Examination नामके ग्रन्थे पाक्षिकान्तर्मूल्याङ्कनमेव समीचीनमित्यभिप्रैति।

**ख.** बाह्यमूल्याङ्कनम् (External Assessment) – बाह्यमूल्याङ्कनं विद्यालयैः, शैक्षिकसंस्थाभिः, विश्वविद्यालयैश्च आयोजिता परीक्षा-द्वारा भवति। एताः षाण्मासिक-वार्षिकपरीक्षाः इति बहिरागतप्रश्नानामाधारेण निर्वहन्ति। एतासु परीक्षासु छात्रेभ्यः लिखितमुत्तराणां, कृतस्य कार्यस्य चाधारेण अङ्कानां वितरणं क्रियते। अत्रायं विशेषः शैक्षिकसंस्थायां प्राप्ताङ्कान् वार्षिकपरीक्षाफलनिर्णयः इति उच्यन्ते।

शिक्षकः शिक्षणोद्देश्यानां ध्यानं प्रदाय प्रश्नपत्रनिर्माणादिकं कृत्वा मूल्याङ्कनं करोति तदा तदवश्यं प्रामाणिकविश्वसनीयतादिगुणसंयुक्तं भवति। तादृशमूल्याङ्कनं छात्राणां सर्वाङ्गीणविकासपरीक्षणे महदुपकरोति।

**मूल्याङ्कनस्योद्देश्यानि**

१. छात्रानुगुणं बुद्धिसंख्यानुगुणं विभाजनम्।

२. छात्राणाम् अभिरुचीनामनुगुणं वृत्तिग्रहणे (To take job) पथप्रदर्शनम्।

३. छात्राणां दैनन्दिने जीवने समागतानां समस्यानां परिष्कारोपायसूचनम्।
४. छात्राणां सामर्थ्यानां बलहीनतानाम् अनुस्मरणम्।
५. मूल्याङ्कनाधारेण विविधेषु महाविद्यालयेषु सम्पादितानां प्रगतौ तौलनम्।
६. नूतनशिक्षणपद्धतिम् अवलम्ब्य शिक्षणे अभिवृद्धिसम्पादनम्।
७. छात्रजीवनस्य प्रत्येकस्तरे परीक्षणं मापनञ्च।
८. मूल्याङ्कने लक्ष्यालक्ष्याणां परिशीलनम्, अपेक्षितं चेत् नूतनलक्ष्यानां योजनञ्च।
९. शिक्षणविधीनां समीकरणे, शिक्षास्तरस्य उन्नतीकरणे च मूल्याङ्कनं सहायकं भवति।

**संस्कृतशिक्षणे परीक्षणविधानम्** – संस्कृतभाषायां छात्राणां परीक्षणाय प्राचीनकालादारभ्य निबन्धरूपप्रश्नानाम् अत्यधिकं प्रयोगः प्रदीयमानमासीत्। इदानीमपि विश्वविद्यालयेषु, महाविद्यालयेषु च निबन्धरूपप्रश्नाः सर्वेषां परीक्षायां भवेयुश्चेत् छात्राणां ज्ञानं अंशतः परीक्ष्यमाणं भवति। अतः नूतनमूल्याङ्कनस्यानुगुणं वस्तुनिष्ठपरीक्षाणां कृते प्राथम्यं प्रदीयते। निबन्धरूपप्रश्नाः 50% अङ्कानां कृते परिमिताः स्युः। अवशिष्टप्रश्नाः वस्तुनिष्ठाः स्युः। अद्यतनेषु दिनेषु संस्कृतशिक्षायां मूल्याङ्कनाय एतस्योपयोगः क्रियते।

पश्चिमबङ्गराज्ये विविधविश्वविद्यालयेषु स्नातकस्तरेषु संस्कृतशिक्षायाः मूल्याङ्कनपद्धतेः भिन्नता दृश्यते एव। तत्र सर्वेषु विश्वविद्यालयेषु स्नातकस्तरे त्रिवर्षियपाठ्यक्रमः प्रचलितास्ति। तत्र केषुचित् विश्वविद्यालयेषु परीक्षाप्रकारः वार्षिकरूपेण केषुचित् च षाण्मासिकरूपेण प्रचलितास्ति। तत्र विश्वविद्यालयभेदेन स्नातकस्तरस्य प्रत्येकस्मिन् वर्षेषु प्रदत्तानामङ्कानां मूल्याङ्कनप्रकारे च भेदः दृश्यते। यद्यपि संस्कृतमेकं भाषारूपेण पाठ्यते तथापि स्नातकस्तरे परीक्षामाध्यमः संस्कृतमेव नास्ति।

**पश्चिमबङ्गराज्ये स्नातकस्तरे विभिन्नविश्वविद्यालयेषु संस्कृतशिक्षणस्य प्रचलितः मूल्यायनपद्धतेः विवरणम्**

| **प्रथमवर्षस्य** | | | | |
|---|---|---|---|---|
| विश्वविद्यालयस्य नाम | परीक्षाप्रकारः | मूल्याङ्कनप्रकाराः अङ्काश्च | | पूर्णमानम् |
| विद्यासागरविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 180अङ्काः | 200 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | 20 अङ्काः | |
| कलकात्ताविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 200 अङ्काः | 200 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | | |
| वर्धमानविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 200 अङ्काः | 200 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | | |
| कल्याणीविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 200 अङ्काः | 200 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | | |
| पश्चिमबङ्गराज्य विश्वविद्यालयः | षाण्मासिकः | बाह्यमूल्याङ्कनम् | 320 अङ्काः | 475 अङ्काः |
| | 1st and 2nd | आन्तरिकमूल्याङ्कनम् | 155 अङ्काः | |
| संस्कृतविश्वविद्यालयः | षाण्मासिकः | बाह्यमूल्याङ्कनम् | 360 अङ्काः | 400 अङ्काः |
| | 1st and 2nd | आन्तरिकमूल्याङ्कनम् | 40 अङ्काः | |

**द्वितीयवर्षस्य1**

| विश्वविद्यालयस्य नाम | परीक्षाप्रकारः | मूल्याङ्कनप्रकाराः अङ्काश्च | | पूर्णमानम् |
|---|---|---|---|---|
| विद्यासागरविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 270अङ्काः | 300 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | 30 अङ्काः | |
| कलकात्ताविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 200 अङ्काः | 200 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | | |
| वर्धमानविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 200 अङ्काः | 200 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | | |
| कल्याणीविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 200 अङ्काः | 200 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | | |
| पश्चिमबङ्गराज्य विश्वविद्यालयः | षाण्माषिकः | बाह्यमूल्याङ्कनम् | 440 अङ्काः | 650 अङ्काः |
| | 3rd and 4th | आन्तरिकमूल्याङ्कनम् | 210 अङ्काः | |
| संस्कृतविश्वविद्यालयः | षाण्माषिकः | बाह्यमूल्याङ्कनम् | 450 अङ्काः | 500 अङ्काः |
| | 3rd and 4th | आन्तरिकमूल्याङ्कनम् | 50 अङ्काः | |

**तृतीयवर्षस्य**

| विश्वविद्यालयस्य नाम | परीक्षाप्रकारः | मूल्याङ्कनप्रकाराःअङ्काश्च | | पूर्णमानम् |
|---|---|---|---|---|
| विद्यासागरविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 270 अङ्काः | 300 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | 30 अङ्काः | |
| कलकात्ताविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 400 अङ्काः | 400 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | | |
| वर्धमानविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 400 अङ्काः | 400 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | | |
| कल्याणीविश्वविद्यालयः | वार्षिकः | बाह्यमूल्याङ्कनम् | 400 अङ्काः | 400 अङ्काः |
| | | आन्तरिकमूल्याङ्कनम् | | |
| पश्चिमबङ्गराज्य विश्वविद्यालयः | षाण्माषिकः | बाह्यमूल्याङ्कनम् | 400 अङ्काः | 600 अङ्काः |
| | 5th and 6th | आन्तरिकमूल्याङ्कनम् | 200 अङ्काः | |
| संस्कृतविश्वविद्यालयः | षाण्माषिकः | बाह्यमूल्याङ्कनम् | 360 अङ्काः | 400 अङ्काः |
| | 5th and 6th | आन्तरिकमूल्याङ्कनम् | 40 अङ्काः | |

## पश्चिमबङ्गराज्ये त्रिवर्षियस्नातकस्तरे विभिन्नविश्वविद्यालयेषु संस्कृतशिक्षणस्य प्रचलितः मूल्यायनपद्धतेः विवरणम्

| विश्वविद्यालयस्य नाम | परीक्षामाध्यमः शतमाधारेण | प्रश्नस्य प्रकाराः शतमाधारेण | पूर्णमानम् | मापनप्रणाली Marks/Grade |
|---|---|---|---|---|
| विद्यासागरविश्वविद्यालयः | संस्कृतमाध्यमेन देवनागरीलिप्यां 40% अङ्काः संस्कृतमाध्यमेन बङ्गभाषालिप्या 20% अङ्काः बङ्गभाषामाध्यमेन - 40% अङ्काः | निबन्धरूपप्रश्नाः 60% अङ्काः वस्तुनिष्ठप्रश्नाः 40% अङ्काः | 800 अङ्काः | Marks |
| कलकात्ताविश्वविद्यालयः | संस्कृतमाध्यमेन देवनागरीलिप्यां 60% अङ्काः संस्कृतमाध्यमेन बङ्गभाषालिप्या 20% अङ्काः बङ्गभाषामाध्यमेन - 20% अङ्काः | निबन्धरूपप्रश्नाः 70% वस्तुनिष्ठप्रश्नाः 30% | 800 अङ्काः | Marks |
| वर्धमानविश्वविद्यालयः | संस्कृतमाध्यमेन देवनागरीलिप्यां 10% अङ्काः संस्कृतमाध्यमेन बङ्गभाषालिप्या 40% अङ्काः बङ्गभाषामाध्यमेन - 50% अङ्काः | निबन्धरूपप्रश्नाः 60% वस्तुनिष्ठप्रश्नाः 40% | 800 अङ्काः | Marks |
| कल्याणीविश्वविद्यालयः | संस्कृतमाध्यमेन देवनागरीलिप्यां 20% अङ्काः संस्कृतमाध्यमेन बङ्गभाषालिप्या 20% अङ्काः बङ्गभाषामाध्यमेन - 60% अङ्काः | निबन्धरूपप्रश्नाः 70% वस्तुनिष्ठप्रश्नाः 30% | 800 अङ्काः | Marks |
| पश्चिमबङ्गराज्य विश्वविद्यालयः | संस्कृतमाध्यमेन देवनागरीलिप्यां 80% अङ्काः संस्कृतमाध्यमेन बङ्गभाषालिप्या बङ्गभाषामाध्यमेन - 20% अङ्काः | निबन्धरूपप्रश्नाः 50% वस्तुनिष्ठप्रश्नाः 50% | 1725 अङ्काः | Grade |
| संस्कृतविश्वविद्यालयः | संस्कृतमाध्यमेन देवनागरीलिप्यां 50% अङ्काः संस्कृतमाध्यमेन बङ्गभाषालिप्या 30% अङ्काः बङ्गभाषामाध्यमेन - 20% अङ्काः | निबन्धरूपप्रश्नाः 50% वस्तुनिष्ठप्रश्नाः 50% | 1300 अङ्काः | Grade |

पश्चिमबङ्गराज्ये स्नातकस्तरे येषु विश्वविद्यालयेषु परीक्षासु मापनप्रणाल्याम् अङ्काः दीयते तत्र अङ्कानां विभाजनमेवं प्रकारेण क्रियते।

| Percentage | Classification/ Division |
|---|---|
| 90% and above | Distinction / Outstanding |
| 70% and above but below 80% | First class |
| 50% and above but below 60% | Second Class |
| 40% and above but below 50% | Pass Class |
| Below 40% | Fail |

पश्चिमबङ्गराज्ये स्नातकस्तरे येषु विश्वविद्यालयेषु परीक्षासु मापनप्रणाल्यां ग्रेड यत्र दीयते तत्र मूल्याङ्कनस्य विभाजनमेवं प्रकारेण क्रियते।

| Letter Grade | Marks | Grade Point |
|---|---|---|
| O | 90–100 | 8 |
| A+ | 80–89.99 | 7 |
| A | 60–79.99 | 6 |
| B | 55–5% | 5 |
| C | 50–54.99 | 4 |
| D | 45–49.99 | 3 |
| E | 40–44.99 | 2 |
| F (Fail) | 39.99 and below | 1 |

### उपसंहार

- पश्चिमबङ्गराज्यस्य स्नातकस्तरे संस्कृतशिक्षणे मूल्याङ्कनं संस्कृतशिक्षणोद्देश्यानि, पाठ्यक्रमञ्च अनुसृत्य सम्पाद्यते।
- स्नातकस्तरेषु संस्कृतशिक्षणस्य मूल्याङ्कनं षाण्मासिक-वार्षिकपरीक्षाभिः सम्पाद्यते।
- मूल्याङ्कने निबन्धात्मकवस्तुनिष्ठोभयमिश्रितपरीक्षाप्रकाराः प्रयुज्यन्ते।
- स्तरेऽस्मिन् आन्तरिकं –बाह्यञ्च मूल्याङ्कनप्रक्रियाद्वयं अनुस्रियते।
- परीक्षायाः माध्यमत्वेन संस्कृतं बङ्गभाषा च स्वीक्रियते।
- विश्वविद्यालयभेदेन मापनस्य कृते मार्कस् ग्रेड उभयोः प्रयोगः दृश्यते।

### मूल्याङ्कने उपयुक्ताः केचन प्रस्तावा

१. प्रश्नपत्रमेतादृशं निर्मातव्यं यत् छात्राः अधीतविषयज्ञानं, स्मरणशक्तिं, चिन्तनशक्तिं कल्पनाशक्तिञ्च उपयुज्य प्रश्नानामुत्तरं दद्युः। तथा चेत् छात्राः कण्ठस्थीकृत्य लेखनं, प्रतिलिपीकरणाद्यनुचितमार्गाणाम् आश्रयणञ्च परित्यजेयुः।

२. अध्यापकाः पारम्परिकप्रणालीमुपेक्ष्य, सप्रमाणं, विश्वसनीयं, वैविध्यपूर्णं, प्रायोगिकञ्च आधुनिकमूल्याङ्कनविधिमाश्रयेयुः। तेन छात्राणां योग्यता सुस्पष्टं निरूपिता स्यात्।

३. मूल्याङ्कने निबन्ध-वस्तुनिष्ठ-मौखिकपरीक्षाभिस्साकं पाठ्यसहगामिक्रियाणाञ्च महत्त्वं स्यात्। एवञ्च बाह्यमूल्याङ्कनेन साकम् आन्तरिकमूल्याङ्कनस्यापि परिगणनं स्यात्।

४. मूल्याङ्कनेन संस्कृतशिक्षणस्य उद्देश्यानां पूर्तिरपि ज्ञातव्या।

५. मूल्याङ्कने परीक्षकैः निष्पक्षदृष्टिकोणः आश्रयणीयः।

६. परीक्षायां सम्पूर्णं पाठ्यक्रममाश्रित्य प्रश्नाः भवेयुः।

### सन्दर्भग्रन्था


१. उपाध्याय, दुर्गावती, (1991), 19 वीं शताव्दी में संस्कृतशिक्षा की स्थिति, सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी।

२. नलचक्रवर्त्ति कानाल, (1996), संस्कृताध्यपनम्, वेङ्कटाम्बा पाब्लिकेशन्, तिरुपतिः।

३. पाण्डेय अरविन्द कुमार, (2004),संस्कृत शिक्षा का विकास (ब्रिटिश कालके विशेष सन्दर्भ में), आदित्य बुक् सेन्टर, वाराणसी।

४. द्विवेदी पारसनाथ, (1989), संस्कृत आयोग का प्रतिवेदन, सम्पूर्णानन्द संस्कृतविश्वविद्यालय, वाराणसि।

५. शास्त्री, काली कुमारदत्त, (1974), कंट्रीव्यूशन टु द संस्कृत लिटरेचर टु बंङ्गाल, कलकात्ता संस्कृत कालेज रिसर्च, सीरीज, संस्कृत कालेज, कलकात्ता।

६. सफाया, रघुनाथ, (1997), संस्कृतशिक्षा, हरियाणा साहित्य अकादमी, चण्डीगढ।

७. Sharma SR. Teaching and Development of Sanskrit, Anmol Publication Pvt. Ltd. Daryaganj, New Delhi, 1994.

८. Dash Kashab Chandra. Elements of Research Methodology in Sanskrit, Chaukambha Sanskrit Sansthan, Varanasi, 1992.